श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ नादपद्धतिः चतुर्दशी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ नादपद्धतिः चतुर्दशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रुतीनां भूषणानां ते शङ्के रङ्गेन्द्रपादुके !।
मिथः सङ्घर्षसञ्जातं रजः किमपि शिञ्जितम्॥ १४.१ ॥

मुरभिन्मणिपादुके ! भवत्याः स्तुतिमाकर्णयतां मया निबद्धाम्।
अवधीरयसीव मञ्जुनादैः अचमत्कारवचांसि दुर्जनानाम्॥ १४.२ ॥

विहितेष्वभिवादनेषु वेदैः गमनोदीरितगर्भरत्ननादा।
मधुरं मधुवैरिपादरक्षे ! भवती प्रत्यभिवादनं विधत्ते॥ १४.३ ॥

स्वदते किमिहैव रङ्गनाथो
मयि तिष्ठन् यदि वा पदे परस्मिन्।
इति पृच्छसि देवि ! नूनमस्मान्
मधुरैस्त्वं मणिपादुके निनादैः॥ १४.४ ॥

अवरोधगतस्य रङ्गभर्तुः गतिषु व्यञ्जितगर्भरत्ननादा।
प्रतिसल्लपसीव पादुके ! त्वं कमलानूपुरमञ्जुशिञ्जितानाम्॥ १४.५ ॥

मुरभिच्चरणारविन्दरूपं महितानन्दमवाप्य पूरुषार्थम्।
अनघैर्मणिपादुके ! निनादैः अहमन्नाद इतीव गायसि त्वम्॥ १४.६ ॥

मधुवैरिपदाम्बुजं भजन्ती मणिपादावनि ! मञ्जुशिञ्जितेन।
पठसीव मुहुः स्वयं प्रजानाम् अपरोपघ्नमरिष्टशान्तिमन्त्रम्॥ १४.७ ॥

श्रुतिभिः परमं पदं मुरारेः
अनिदङ्कारमनेवमित्युपात्तम्।
इदमित्थमिति ब्रवीषि नूनं
मणिपादावनि ! मञ्जुभिः प्रणादैः॥ १४.८ ॥

मुनयः प्रणिधानसन्निरुद्धे
    हृदि रङ्गेश्वररत्नपादुके ! त्वाम्।
विनिवेश्य विभावयन्त्यनन्याः
    प्रणवस्य प्रणिधिं तव प्रणादम्॥ १४.९ ॥

मधुरं मणिपादुके ! प्रवृत्ते भवती रङ्गपतेर्विहारकाले।
अभयार्थनया समभ्युपेतान् अविसंवादयतीव मञ्जुनादैः॥ १४.१० ॥

श्रवसोर्मम पारणां दिशन्ती मणिपादावनि ! मञ्जुलैः प्रणादैः।
रमया क्षमया च दत्तहस्तं समये रङ्गधुरीणमानयेथाः॥ १४.११ ॥

अनुयाति नित्यममृतात्मिकां कलां
    तव रङ्गचन्द्रमणिपादु ! झङ्कृतम्।
श्रवसा मुखेन परिभुज्य यत्क्षणात्
    अजरामरत्वमुपयान्ति साधवः॥ १४.१२ ॥

परुषैरजस्रमसतामनर्थकैः
    परिवादपैशुनविकत्थनादिभिः।
मधुकैटभारिमणिपादुके ! मम
    श्रुतिदुष्कृतानि विनिवारय स्वनैः॥ १४.१३ ॥

पादुके ! परिजनस्य दूरतः सूचयन्ति खलु तावकाः स्वनाः।
लीलया भुजगतल्पमुज्झतः श्रीमतस्त्रिचतुरान् पदक्रमान्॥ १४.१४ ॥

देवि ! दैत्यदमनाय सत्वरं
    प्रस्थितस्य मणिपादुके ! प्रभोः।
विश्वमङ्गळविशेषसूचकं
    शाकुनं भवति तावकं रुतम्॥ १४.१५ ॥

दातुमर्हसि तदा मम श्रुतौ देवि ! रङ्गपरिरत्नपादुके !।
विह्वलस्य भवदीयशिञ्जितं स्वादु कर्णरसनारसायनम्॥ १४.१६ ॥

अहमुपरि समस्तदेवतानाम्
    उपरि ममैष विभाति वासुदेवः।
तदिह परतरं न किञ्चिदस्मात्
    इति वदसीव पदावनि ! प्रणादैः॥ १४.१७ ॥

अवनतविबुधेन्द्रमौळिमाला
    मधुमदशिक्षितमन्थरप्रयाता।
प्रथयसि परिरब्धशौरिपादा
    मणिकलहेन वियातजल्पितानि॥ १४.१८ ॥

आस्थानेषु त्रिदशमहितान् वर्तयित्वा विहारान्
    स्थाने स्थाने निजपरिजनं वारयित्वा यथार्हम्।
वासागारं स्वयमुपसरन् पादुके ! मञ्जुनादाम्
    आपर्यङ्कान्न खलु भवतीं रङ्गनाथो जहाति॥ १४.१९ ॥

अन्तर्न्यस्तैर्मणिभिरुदितं पादुके ! रङ्गबन्धौ
    मन्दं मन्दं निहितचरणे मञ्जुळं ते निनादम्।
पश्यन्त्यादिक्रमपरिणतेः प्राक्तनीं तां परायाः
    मन्ये मित्रावरुणविषयादुच्चरन्तीमवस्थाम्॥ १४.२० ॥

प्रख्यातानां परिषदि सतां कारयित्वा प्रतिज्ञां
    प्रायेण त्वां प्रथितविभवां वर्णयन्ती मया त्वं।
पादन्यासक्रममनुगुणं प्राप्य रङ्गाधिराजात्
    पद्यारम्भान् गणयसि परं पादुके ! स्वैर्निनादैः॥ १४.२१ ॥

विष्णोरस्मिन् पदसरसिजे वृत्तिभेदैर्विचित्रैः
    ऐदम्पर्यं निगमवचसामैककण्ठ्येन सिद्धम्।
इत्थं पुंसामनिपुणधियां पादुके ! त्वं तदेव
    स्पृष्ट्वा सत्यं वदसि नियतं मञ्जुना शिञ्जितेन॥ १४.२२ ॥

आम्नायैस्त्वामनितरपरैः स्तोतुमभ्युद्यतानां
    मध्ये भक्त्या मधुविजयिनः पादुके ! मोहभाजाम्।

शिक्षातत्त्वस्खलितवचसां शिक्षयस्येव पुंसां
मात्रादीनि स्वयमनुपदं मञ्जुभिः स्वैर्निनादैः॥ १४.२३ ॥

लक्ष्मीकान्तं कमपि तरुणं रथ्यया निष्पतन्तं
रागाद् द्रष्टुं त्वरितमनसां राजधानीवधूनाम्।
प्रत्यादेशं भजति मधुरैः पादुके ! शिञ्जितैस्ते
चेतोहारी कुसुमधनुषः शिञ्जिनीमञ्जुनादः॥ १४.२४ ॥

रङ्गाधीशे सह कमलया सादरं यायजूकैः
सारं दिव्यं सवनहविषां भोक्तुमाहूयमाने।
नेदीयोभिर्निगमवचसां नित्यमंहःप्रतीपैः
प्रत्यालापं दिशति भवती पादुके ! शिञ्जितैः स्वैः॥ १४.२५ ॥

उपास्य नूनं मणिपादुके ! त्वां रङ्गेशपादाम्बुजराजहंसीम्।
पत्युः प्रजानामलभन्त पूर्वं मञ्जु स्वनं वाहनराजहंसाः॥ १४.२६ ॥

अनादिमायारजनीवशेन प्रस्वापभाजां प्रतिबोधनार्हाम्।
पश्यामि नित्योदितवासरस्य प्रभातनान्दीमिव पादुके ! त्वाम्॥ १४.२७ ॥

शृणोतु रङ्गाधिपतिः प्रजानाम् आर्तध्वनिं क्वापि समुज्जिहानम्।
इतीव मत्वा मणिपादुके ! त्वं मन्दप्रचारैः मृदुशिञ्जिताऽसि॥ १४.२८ ॥

अन्ते ममार्तिं शमयिष्यतस्ताम् अग्रेसराण्यापततो मुरारेः।
श्रमोपपन्नः शृणुयां भवत्याः शीतानि पादावनि ! शिञ्जितानि॥ १४.२९ ॥

स्वादूनि रङ्गेश्वरपादरक्षे ! श्रोत्रैः पिबन्तस्तव शिञ्जितानि।
पचन्त्यविद्योपचितानशेषान् अन्तर्गतानात्मविदः कषायान्॥ १४.३० ॥

अवैमि रङ्गाधिपतेः सकाशात् अवेक्षमाणेषु जनेषु रक्षाम्।
उदारनादां मणिपादुके ! त्वाम् ओमित्यनुज्ञाक्षरमुद्गिरन्तीम्॥ १४.३१ ॥

मधुद्विषः स्वैरविहार हेतुः मञ्जुस्वनान् शिक्षयसीव मातः !।
पर्यन्तभाजोर्मणिपादरक्षे ! पद्माधरण्योर्मणिनूपुराणि॥ १४.३२ ॥

प्रास्थानिकेषु समयेषु समागतेषु
    प्राप्ता पदं परिचितं द्विजपुङ्गवेन।
पुष्णासि रङ्गनृपतेर्मणिपादुके ! त्वं
    पुण्याहघोषमिव गर्भमणिप्रणादैः॥ १४.३३ ॥

आर्तध्वनेरुचितमुत्तरमन्तकाले
    कर्णेषु मञ्जुनिनदेन करिष्यसीति।
वासं भजन्ति कृतिनो मणिपादरक्षे !
    पुण्येषु देवि ! पुळिनेषु मरुद्वृधायाः॥ १४.३४ ॥

दूत्ये बलेर्विमथने शकटस्य भङ्गे
    यात्रोत्सवेषु च विभोः प्रतिपन्नसख्या।
वीरायितानि बिरुदोपहितानि नूनं
    मञ्जुस्वनैः प्रथयसे मणिपादुके ! त्वम्॥ १४.३५ ॥

स्तोतुं प्रवृत्तमपि मां निगमस्तुतां त्वां
    व्यासज्यमानकरणं विषयेष्वजस्रम्।
अन्तर्मणिध्वनिभिरच्युतपादुके ! त्वं
    सम्बोधयस्यनुकलं सहजानुकम्पा॥ १४.३६ ॥

देवस्य दानवरिपोर्मणिपादरक्षे !
    प्रस्थानमङ्गळविधौ प्रतिपन्ननादाम्।
मा भैष्ट साधव इति स्वयमालपन्तीं
    जाने जगत्त्रितयरक्षणदीक्षितां त्वां॥ १४.३७ ॥

स्वच्छन्दविभ्रमगतौ मणिपादुके ! त्वं
    पादारविन्दमधिगम्य परस्य पुंसः।
जातस्वना प्रतिपदं जपसीव सूक्तं
    विद्रावणं किमपि वैरिवरूथिनीनाम्॥ १४.३८ ॥

रक्षार्थमाश्रितजनस्य समुज्जिहाने
    रङ्गेश्वरे शरदि शेषभुजङ्गतल्पात्।

नादास्तव श्रुतिसुखा मणिपादरक्षे !
प्रस्थानशङ्खनिनदात् प्रथमे भवन्ति॥ १४.३९ ॥

नित्यं पदाम्बुरुहयोरिह गोपिकां त्वां
गोपीजनप्रियतमो मणिपादरक्षे।
सम्पन्नघोषविभवां गतिभिर्निजाभिः
प्रीत्येव न त्यजति रङ्गसमाश्रितोऽपि॥ १४.४० ॥

प्रायः पदावनि ! विभोः प्रणतार्तिहन्तुः
प्रस्थानमङ्गळविधौ प्रथमोद्यतानि।
त्वच्छिञ्जितानि सपदि स्वयमारभन्ते
कालोचितान् कनककाहळशङ्खनादान्॥ १४.४१ ॥

आम्रेडितश्रुतिगणैर्निनदैर्मणीनाम्
आम्नायवेद्यमनुभावमभङ्गुरं ते।
उद्गास्यतां नियतमिच्छसि सामगानां
तानप्रदानमिव शौरिपदावनि ! त्वम्॥ १४.४२ ॥

रथ्यासु रङ्गनृपतेर्मणिपादरक्षे !
त्वद्गर्भरत्नजनितो मधुरः प्रणादः।
सन्दर्शनोत्सुकधियां पुरसुन्दरीणां
संपद्यते श्रवणमोहनमन्त्रघोषः॥ १४.४३ ॥

आकस्मिकेषु समयेष्वपवार्य भृत्यान्
अन्तःपुरं विशति रङ्गपतौ सलीलम्।
व्यामोहनेन भवती सुदृशामधीते
मञ्जुस्वनेन मदनोपनिषद्रहस्यम्॥ १४.४४ ॥

यात्राविहारसमयेषु समुत्थितं ते
रङ्गाधिपस्य चरणावनि ! मञ्जु नादम्।
पर्याकुलेन्द्रियमृगग्रहणाय पुंसां
सम्मोहनं शबरगीतमिव प्रतीमः॥ १४.४५ ॥

प्रायेण सह्यदुहितुर्नदराजकन्या
    जामातुरागमनसूचनमीहमाना।
मञ्जुप्रणादसुभगैर्मणिपादुके ! त्वाम्
    अन्तर्युतामकृत यौतकरत्नखण्डैः॥ १४.४६ ॥

नित्यं विहारसमये निगमानुयातैः
    विक्षेपताण्डवितगर्भमणिप्रसूतैः।
नादैः स्वयं नरकमर्दनपादरक्षे !
    नादावसाननिलयं वदसीव नाथम्॥ १४.४७ ॥

साधारणेषु युवयोर्मणिपादरक्षे !
    देवस्य दानवरिपोस्त्रिषु विक्रमेषु।
अद्यापि शिञ्जितमिषादनुवर्तमानं
    न्यूनाधिकत्वविषयं कलहं प्रतीमः॥ १४.४८ ॥

प्रायः पदावनि ! विभोः प्रणयापराधे
    मानग्रहं शमयितुं महिषीजनानाम्।
उच्चारयन्ति निनदैस्तव गर्भरत्ना-
    न्युद्घातमक्षरमुपाश्रयभारतीनाम्॥ १४.४९ ॥

अन्तश्चरेषु पवनेषु जितेष्वभिज्ञाः
    प्रत्यङ्मुखीं परिणमय्य मनःप्रवृत्तिम्।
आस्वादयन्ति सरसं मणिपादरक्षे !
    नादावसानसमये भवतीनिनादम्॥ १४.५० ॥

दाक्षिण्यमत्र नियतं नियता सुधाऽस्मिन्
    नित्युद्गतो नियतमच्युतपादरक्षे !।
प्रत्येकसंश्रितपदस्तुतये भवत्योः
    सङ्घर्षवाद इव मध्यमणिप्रणादः॥ १४.५१ ॥

सञ्चारकेळिकलहायितगर्भरत्ना
    सांसिद्धिकं सकलजन्तुषु सार्वभौमम्।

रक्षार्थिनां प्रथयसीव पदावनि ! त्वं
　　रङ्गेश्वरस्य निरवग्रहमानृशंस्यम्॥ १४.५२ ॥

प्राप्तुं परं पुरिशयं पुरुषं मुनीनाम्
　　अभ्यस्यतामनुदिनं प्रणवं त्रिमात्रम्।
श्रीरङ्गराजचरणावनि ! शिञ्जितं ते
　　शङ्के समुन्नयनसामविशेषघोषम्॥ १४.५३ ॥

नित्यं समाहितधियामुपदर्शयन्ती
　　नागेशयं किमपि धाम निजोर्ध्वभागे।
हृत्कर्णिकामनुगता मणिपादुके ! त्वं
　　मञ्जुस्वना स्फुरसि वाग्भ्रमरी परेव॥ १४.५४ ॥

मानेषु दानवरिपोर्मणिपादरक्षे !
　　त्वामाश्रितेषु निगमेष्ववधीरितेषु।
मञ्जुस्वनैर्वदसि मैवमितीव मातः !
　　वेलां लिलङ्घयिषतो मनुजान्निरोद्धुम्॥ १४.५५ ॥

क्रन्दत्सु कातरतया करणव्यपाये
　　रङ्गोपशल्यशयितेषु जनेष्वलक्ष्यम्।
आसीदसि त्वरितमस्खलितानुकम्पा
　　मातेव मञ्जुनिनदा मणिपादुके ! त्वम्॥ १४.५६ ॥

भास्वत्सुवर्णवपुषां मणिपादरक्षे !
　　पद्मासहायपदपद्मविभूषणानाम्।
मञ्जीरशिञ्जितविकल्पितमञ्जुनादा
　　मञ्जूषिकेव भवती निगमान्तवाचाम्॥ १४.५७ ॥

रङ्गेशपादकमलात् त्वदधीनवृत्तेः
　　अन्येषु केषुचिदलक्ष्यमनन्यवेद्यम्।
आम्नायगूढमबहिर्मणिभिः क्वणद्भिः
　　नेदीयसां प्रथयसीव निजानुभावम्॥ १४.५८ ॥

कालोपपन्नकरणात्ययनिर्विचेष्टे
    जातश्रमे मयि जनार्दनपादरक्षे !।
आश्वासनाय पुरतः प्रसरन्तु मातः !
    वार्ताहरास्तव रवाः शमितार्तयो मे॥ १४.५९ ॥

संरक्षणाय समये जगतां त्रयाणां
    यात्रासु रङ्गनृपतेरुपतस्थुषीषु।
सम्पत्स्यते श्रुतिसुखैर्मणिपादरक्षे !
    मङ्गळ्यसूक्तिरनघा तव मञ्जुनादैः॥ १४.६० ॥

गर्भोपलैर्गमनवेगवशाद्विलोलैः
    वाचालिता मधुभिदो मणिपादुके ! त्वम्।
प्रस्तौषि भावितधियां पथि देवयाने
    प्रस्थानमङ्गळमृदङ्गविशेषघोषम्॥ १४.६१ ॥

पर्यङ्कमाश्रितवतो मणिपादुके ! त्वं
    पादं विहाय परिकल्पितमौनमुद्रा।
श्रोतुं प्रभोरवसरं दिशसीव मातः !
    नाभीसरोजशयितार्भकसामगीतिम्॥ १४.६२ ॥

भोगाय देवि ! भवती मणिपादरक्षे !
    पद्मासहायमधिरोप्य भुजङ्गतल्पे।
विश्वस्य गुप्तिमधिकृत्य विहारहीना
    वाचंयमा किमपि चिन्तयतीव कार्यम्॥ १४.६३ ॥

नित्यप्रबोधसुभगे पुरुषे परस्मिन्
    निद्रामुपेयुषि तदेकविहारशीला।
मञ्जुस्वनं विजहती मणिपादुके ! त्वं
    संवेशमिच्छसि परं चरणान्तिकस्था॥ १४.६४ ॥

लास्यं विहाय किमपि स्थितमाश्रयन्ती
    रङ्गेश्वरेण सहिता मणिमण्डपेषु।

मञ्जुस्वनेषु विरतेष्वपि विश्वमेतत्
मौनेन हन्त भवती मुखरीकरोति॥ १४.६५ ॥

विस्मापितेव भवती मणिपादरक्षे !
वैरोचनेर्वितरणेन तथाविधेन।
एतावताऽलमिति देवि ! गृहीतपादा
नाथं त्रिविक्रममवारयतेव नादैः॥ १४.६६ ॥

सामानि रङ्गनृपतिः सरसं च गीतं
लीलागतेषु विनिवारयति स्वतन्त्रः।
श्रोतुं तव श्रुतिसुखानि विशेषवेदी
मञ्जूनि काञ्चनपदावनि ! शिञ्जितानि॥ १४.६७ ॥

तत्तादृशीं प्रथयता सुचिरां स्वरेखां
वर्णाधिकेन मधुसूदनपादरक्षे !।
पश्यन्ति चित्तनिकषे विनिवेश्य सन्तो
मञ्जुस्वनेन तव नैगमिकं सुवर्णम्॥ १४.६८ ॥

मुग्धस्य हन्त भवतीं स्तुवतो ममैता-
न्याकर्ण्य नूनमयथायथजल्पितानि।
इत्थं वद त्वमिति शिक्षयितुं प्रणादान्
मञ्जूनुदीरयसि माधवपादुके ! त्वम्॥ १४.६९ ॥

आदौ सहस्रमिति यत्सहसा मयोक्तं
तुष्टूषता निरवधिं महिमार्णवं ते।
आम्रेडयस्यथ किमेतदमृष्यमाणा
मञ्जुस्वनेन मधुजिन्मणिपादुके ! त्वम्॥ १४.७० ॥

परिमितपरिबर्हं पादुके ! सञ्चरिष्णौ
त्वयि विनिहितपादे लीलया रङ्गनाथे।
नियमयति विपञ्चीं नित्यमेकान्तसेवी
निशमयितुमुदारान्नारदस्ते निनादान्॥ १४.७१ ॥

विहरति विशिखायां रङ्गनाथे सलीलं
गमनवशविलोलैर्गर्भरत्नैः क्वणन्त्याः।
मणिवलयनिनादैर्मञ्जुलैस्ते दिशन्ति
प्रतिवचनमुदारं पादुके ! पौरनार्यः॥ १४.७२ ॥

अनुकृतसवनीयस्तोत्रशस्त्रां निनादैः
अनुगतनिगमां त्वामास्थितो रङ्गनाथः।
अनितरविबुधार्हं हव्यमास्वादयिष्यन्
विशति चरणरक्षे ! यज्ञवाटं द्विजानाम्॥ १४.७३ ॥

चरणकमलमेतद्रङ्गनाथस्य नित्यं
शरणमिति जनानां दर्शयन्ती यथावत्।
प्रतिपदमपि हृद्यं पादुके ! स्वादुभावात्
अनुवदति परं ते नादमाम्नायपङ्क्तिः॥ १४.७४ ॥

रहितभुजगतल्पे त्वत्सनाथे प्रजानां
प्रतिभयशमनाय प्रस्थिते रङ्गनाथे।
प्रथममुदयमानः पादुके ! तूर्यघोषात्
प्रतिफलति निनादः पाञ्चजन्ये त्वदीयः॥ १४.७५ ॥

वकुळधरतनुस्त्वं संहितां यामपश्यः
श्रुतिपरिषदि तस्याः सौरभं योजयन्ति।
हरिचरणसरोजामोदसम्मोदितायाः
प्रतिपदरमणीयाः पादुके ! ते निनादाः॥ १४.७६ ॥

दनुतनयनिहन्तुर्जैत्रयात्रानुकूले
शरदुपगमकाले सह्यजामापतन्ति।
श्रुतिमधुरमुदारं शिक्षितुं ते निनादं
परिहृतनिजवासाः पादुके ! राजहंसाः॥ १४.७७ ॥

विहरणसमयेषु प्रत्यहं रङ्गभर्तुः
चरणनखमयूखैः सोत्तरीया विशुद्धैः।

परिणमयसि नादं पादुके ! गर्भरत्नैः
　　दमयितुमिव शिष्यान् दीर्घिकाराजहंसान्॥ १४.७८ ॥

परिषदि विरतायां पादुके ! रङ्गभर्तुः
　　परिजनमपवार्य प्रस्थितस्यावरोधान्।
मणिनिकरसमुद्यन्मञ्जुनादापदेशात्
　　अभिलपसि यथार्हं नूनमालोकशब्दम्॥ १४.७९ ॥

गुरुजननियतं तद् गोपिकानां सहस्रं
　　दिनकरतनयायाः सैकते दिव्यगोपः।
वशमनयदयत्नात् वंशनादानुयातैः
　　तव खलु पदरक्षे ! तादृशैर्मञ्जुनादैः॥ १४.८० ॥

निजपदविनिवेशान्निर्विशेषप्रचारान्
　　परिणमयति भक्तान् रङ्गनाथो यथा माम्।
इति विहरणकाले मञ्जुशिञ्जाविशेषैः
　　हितमुपदिशसीव प्राणिनां पादुके ! त्वम्॥ १४.८१ ॥

अयमयमिति तैस्तैः कल्पितानध्वभेदान्
　　प्रतिपदमवलोक्य प्राणिनां व्याकुलनाम्।
चटुलमणिकलापैः शौरिपादावनि ! त्वं
　　मुखरयसि विहारैर्मुक्तिघण्टापथाग्र्यम्॥ १४.८२ ॥

पदकमलमुदारं दर्शयन्ती मुरारेः
　　कलमधुरनिनादा गर्भरत्नैर्विलोलैः।
विषमविषयतृष्णाव्याकुलानि प्रजानाम्
　　अभिमुखयसि नूनं पादुके ! मानसानि॥ १४.८३ ॥

मधुरिपुपदरक्षे ! मन्दबुद्धौ मयि त्वाम्
　　अनवधिमहिमानं त्वत्प्रसादात् स्तुवाने।
मणिनिकरसमुत्थैर्मञ्जुनादैः कवीनाम्
　　उपरमयसि तांस्तान् नूनमुत्सेकवादान्॥ १४.८४ ॥

शरणमुपगते त्वां शार्ङ्गिणः पादरक्षे !
सकृदिति विधिसिद्धं त्यक्तुकामे विमोहात्।
प्रचलितमणिजालव्यञ्जितैः शिञ्जितैः स्वैः
अलमलमिति नूनं वारयस्यादरेण॥ १४.८५॥

विकलकरणवृत्तौ विह्वलाङ्गे विलक्षं
विलपति मयि मोहात् बिभ्रती शौरिपादम्।
परिसरमधिगन्तुं पश्य पादावनि ! त्वं
प्रतिभयमखिलं मे भर्त्सयन्ती निनादैः॥ १४.८६॥

करणविगमकाले कालहुङ्कारशङ्की
द्रुतपदमुपगच्छन् दत्तहस्तः प्रियाभ्याम्।
परिणमयतु कर्णे रङ्गनाथः स्वयं नः
प्रणवमिव भवत्याः पादुके ! मञ्जुनादम्॥ १४.८७॥

कमलवनसखीं तां कौमुदीमुद्वहन्तं
सविधमुपनयन्ती तादृशं रङ्गचन्द्रम्।
प्रळयदिनसमुत्थान् पादुके ! मामकीनान्
प्रशमय परितापान् शीतलैः शिञ्जितैः स्वैः॥ १४.८८॥

प्रशमयतु भयं नः पश्चिमश्वासकाले
रहसि विहरणं ते रङ्गनाथेन सार्धम्।
नियतमनुविधत्ते पादुके ! यन्निनादो
निखिलभुवनरक्षाघोषणाघोषलीलम्॥ १४.८९॥

त्रिकविनिहितहस्तं चिन्तयित्वा कृतान्तं
गतवति हृदि मोहं गच्छता जीवितेन।
परिकलयतु बोधं पादुके ! शिञ्जितं ते
त्वरयितुमिव सज्जं त्वद्विधेयं मुकुन्दम्॥ १४.९०॥

उपघ्नं संवित्तेरुपनिषदुपोद्घातवचनं
तव श्रावं श्रावं श्रुतिसुभगमन्तर्मणिरवम्।

विजृम्भन्ते नूनं मधुमथनपादावनि ! मम
    द्रवीभूतद्राक्षामधुरिमधुरीणाः फणितयः॥ १४.९१ ॥

विलासैः क्रीणन्तो निखिलजनचेतांसि विविधाः
    विहारास्ते रङ्गक्षितिरमणपादावनि ! मुहुः।
विगाहन्तामन्तर्मम विलुठदन्तर्मणिशिला
    खलात्कारव्याजक्षरदमृतधाराधमनयः॥ १४.९२ ॥

श्रुतिश्रेणीस्थेयश्रुतिसुभगशिञ्जामुखरितां
    भजेम त्वां पद्मारमणचरणत्रायिणि ! परम्।
न मुद्रानिद्राणद्रविणकणविश्राणनदशा
    विशालाहङ्कारं कमपि घनहुङ्कारपरुषम्॥ १४.९३ ॥

तवैतच्छ्रीरङ्गक्षितिपतिपदत्रायिणि ! नृणां
    भवत्यागश्चिन्तारणरणकभङ्गाय रणितम्।
शरीरे स्वं भावं प्रथयति यदाकर्णनवशात्
    न नः कर्णे भावी यममहिषघण्टाघणघणः॥ १४.९४ ॥

परित्रस्ताः पुण्यद्रवपतनवेगात् प्रथमतः
    क्षरद्भिः श्रीरङ्गक्षितिरमणपादावनि ! तदा।
विदामासुर्देवा बलिमथनसंरम्भमनघैः
    प्रणादैस्ते सद्यः पदकमलविक्रान्तिपिशुनैः॥ १४.९५ ॥

स्वेषु स्वेषु पदेषु किं नियमयस्यष्टौ दिशामीश्वरान्
    स्वैरालापकथाः प्रवर्तयसि किं त्रय्या सहासीनया।
रङ्गेशस्य समस्तलोकमहितं प्राप्ता पदाम्भोरुहं
    मा भैषीरिति मामुदीरयसि वा मञ्जुस्वनैः पादुके !॥ १४.९६ ॥

रङ्गे देवि ! रथाङ्गपाणिचरणस्वच्छन्दलीलासखि !
    स्तोकस्पन्दितरम्यविभ्रमगतिप्रस्तावकं तावकम्।
कालोपागतकालकिङ्करचमूहुङ्कारपारम्परी-
    दुर्वारप्रतिवावदूकमनघं श्रोष्यामि शिञ्जारवम्॥ १४.९७ ॥

त्वच्छिञ्जारवशर्करारससदास्वादात् सतामुन्मदा
    मातर्माधवपादुके ! बहुविदां प्रायः श्रुतिर्मुह्यति।
सारासारसकृद्विमर्शनपरिम्लानाक्षरग्रन्थिभिः
    ग्रन्थैस्त्वामिह वर्णयाम्यहमतस्त्रासत्रपावर्जितः॥ १४.९८ ॥

तवाम्ब ! किल खेलतां गतिवशेन गर्भाश्मनां
    रमारमणपादुके ! किमपि मञ्जुभिः शिञ्जितैः।
पदस्तुतिविधायिभिस्त्वदनुभावसिद्धान्तिभिः
    सयूथ्यकलहायितं श्रुतिशतं समापद्यते॥ १४.९९ ॥

क्षिपति मणिपादरक्षे ! नादैर्नूनं समाश्रितत्राणे।
रङ्गेश्वरस्य भवती रक्षापेक्षाप्रतीक्षणविळम्बम्॥ १४.१०० ॥

॥ इति श्रीपादुकासहस्रे नादपद्धतिः चतुर्दशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥